# संस्कृत-वार्ता:

दिनाङ्क : 28/02/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी राजस्थानस्य अजमेर-नगरे चतुर्दशवर्षीयाणां बालिकानां कृते राष्ट्रव्यापी-HPV-प्रतिरक्षण-अभियानस्य शुभारम्भं कृतवान्।
- प्रधानमन्त्री अद्य गुजरातस्य प्रवासावधौ सानन्दे मैक्रान् सेमिकण्डक्टर् टेक्नालजी इण्डिया प्राईवेट् लिमिटेड् इत्यस्य सेमिकण्डक्टर् असेम्बली, टेस्ट् एण्ड् पेकेजिङ्ग् सौकर्यस्य उद्घाटनम् अकरोत्।
- इजरायल-देशः संयुक्तराज्य-अमेरिका च अद्य ईरान-देशोपरि भीषणम् आक्रमणं कृतवन्तौ।
- इज़रायल-देशे अनुवर्तमानां सुरक्षा-स्थितिं उद्दिश्य भारत-सर्वकारेण तत्र स्थिताः भारतीय-नागरिकाः सावधानतया स्थातुं निर्दिष्टाः।
- रक्षा अनुसंधान एवं विकास संगठनेन, ओडिशा-तटस्य चांदीपुरस्य एकीकृत-परीक्षण-क्षेत्रात् अति-अल्प-परिधि-वायु-रक्षा-प्रणाल्याः त्रीणि उड्डयन-परीक्षणानि सफलतया सम्पादितानि।
- क्रिकेट्-क्रीडायां, हुबली-नगरे कर्नाटकं पराजित्य, जम्मू-कश्मीर-राज्येण प्रथमवारं रणजी-ट्रोफीति विजित्य ऐतिह्यं विरचितम्।

-----------------------------------------------------

<u>प्रधानमन्त्री-यात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी राजस्थानस्य अजमेर-नगरे चतुर्दशवर्षीयाणां बालिकानां कृते राष्ट्रव्यापी-HPV-प्रतिरक्षण-अभियानस्य शुभारम्भं कृतवान्। पञ्च-बालिकाभ्यः 'HPV' सूच्यौषधं प्रदाय औपचारिकरूपेण अस्य अभियानस्य शुभारम्भो जातः। अत्रावसरे प्रधानमन्त्री षोडश-सहस्र-कोटि-रूप्यतोऽप्यधिकानां विविध-परियोजनानां उद्घाटनं, शिलान्यासञ्च अकरोत्। सहैव राजस्थान-सर्वकारस्य विभिन्न-विभागेषु नवनियुक्तेभ्यः एकविंशति-सहस्रतोऽप्यधिकेभ्यः

युवकेभ्यः सः नियुक्ति-पत्राणि वितरीतवान्। अवसरेऽस्मिन् प्रधानमन्त्री प्रोक्तवान् यत् भाजपा-सर्वकारः सर्वदा महिलानां लघु-समस्यानामपि निवारणाय प्राथमिकतां प्रयच्छति। सः अवदत् यत् गर्भाशय-मुख-कर्कट-रोगस्य निवारणाय इदं प्रतिरक्षण-अभियानं महिलानां सशक्तिकरणाय कश्चन महत्वपूर्ण-पदक्षेपः वर्तते।

श्री मोदिना प्रोक्तं यत् महिलाः प्रत्येकस्य गृहस्य आधारभूताः वर्तन्ते सहैव चतुर्दशाधिक-द्विसहस्रतमात् भाजपासर्वकारेण महिलानां कृते बह्व्यः परियोजनाः प्रचालिताः।

भारतीय-सशस्त्र-बलानां प्रशंसां कुर्वन् प्रधानमन्त्री अवदत् यत् देशस्य सेना प्रत्येकस्मिन् स्तरे साफल्यं प्राप्नोति। किन्तु काँग्रेस-दलेन रक्षा-बलानां विषये प्रश्नाः उत्थापिताः। अतः देशः सम्प्रति काँग्रेस-दलं निवारयति। नवदिल्ल्यां एआई-इम्पैक्ट-समिट-कार्यक्रमे काँग्रेस-दलस्य अभद्र-व्यवहारं लक्ष्यीकृत्य सः अवदत् यत् एतादृशेन भव्य-आयोजनेन सम्पूर्णः देशः गौरवान्वितः आसीत्, परन्तु निर्वाचनेषु वारं-वारं पराजयेन दुःखितः काँग्रेस-दलम् अन्ताराष्ट्रिय-अतिथीनां पुरतः देशस्य निन्दां करोति।

---

**प्रधानमन्त्री-गुजरातः**

प्रधानमन्त्री अद्य गुजरातस्य प्रवासावधौ सानन्दे मैक्रान् सेमिकण्डक्टर् टेक्नालजी इण्डिया प्राईवेट् लिमिटेड् इत्यस्य सेमिकण्डक्टर् असेम्बली, टेस्ट् एण्ड् पेकेजिङ्ग् सौकर्यस्य उद्घाटनम् अकरोत्। साणन्द-ए. टि. एम्. पि. सौकर्यात् प्रथमस्य मेड्-इन्-इण्डिया सेमिकण्डक्टर्-मेमोरी-माड्यूल् इत्यस्य वाणिज्यिक-उत्पादनस्य, प्रेषणस्य च आरम्भेण, उद्घाटनम् भारतस्य सेमिकण्डक्टर्-निर्माणयात्रायां महत्त्वपूर्णं सोपानं निर्दिशति। अयं विकासः वैश्विक-सेमिकण्डक्टर्-मूल्यशृङ्खलायां भारतस्य स्थानं सुरक्षयितुं प्रमुखं सोपानं निरूपयति। अस्मिन् अवसरे जनसमूहं सम्बोधयन् श्रीमोदी अवदत् यत् भारते आयोजितं इण्डिया-ए. आई. इम्पैक्ट-शिखरसम्मेलनं स्वस्य ए. आई. क्षमतावशात् विश्वं प्रभावयति।

अस्मिन् अवसरे केन्द्रीय-सूचना-प्रसरण-मन्त्री अश्विनी-वैष्णवः अवदत् यत् सेमिकण्डक्टर्-उद्योगः आधारभूत-समवायः अस्ति येन वैश्विक-मानचित्रे भारतस्य स्थानं सुनिश्चितम्। सः अवदत् यत्, प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे इलेक्ट्रानिक्स्-उत्पादनं षट्गुणितं वृद्धिम्

अवाप्नोत् , इलेक्ट्रानिक्स्-निर्यातः अष्टगुणितं वृद्धिम् प्राप्नोदिति। सः अवदत् यत्, अधुना चर-दूरवाण्याः निर्यातः देशस्य प्रमुखेषु वस्तुषु अन्यतमः अभवदिति।

---------------------------------------------------------

## इज़राइन-ईरानौ

इजरायल-देशः संयुक्तराज्य-अमेरिका च अद्य ईरान-देशोपरि भीषणम् आक्रमणं कृतवन्तौ। तेहरानं समेत्य ईरानस्य बहुषु नगरेषु विस्फोटाः अभवन्। अमेरिका-राष्ट्रपतिः डोनाल्ड-ट्रम्पः सामाजिक-माध्यमेन प्रसारितस्य अष्ट-निमेषात्मकस्य चित्राङ्कनस्य विषये प्रोक्तवान् यत् वाशिंगटन-प्रशासनेन ईरान-देशे सैन्य-अभियानस्य आरम्भः कृतः। तेनोदीरितं यत् वर्तमान-ईरानी-प्रशासनात् अमेरिका-देशस्य राष्ट्रिय-सुरक्षा-हितं रक्षितुं अमेरिकी-सेना व्यापकं निरन्तरं च अभियानं प्रचालयति। सः एतदपि अघोषयत् यत् अस्य प्रहारस्य मुख्योद्देश्यं ईरानी-प्रशासनात् सङ्कटं निवार्य अमेरिकी-जनानां रक्षाकरणम् इत्यस्ति। इज़रायलदेशस्य रक्षामन्त्री इज़रायल-काट्ज़ अवदत् यत् तस्य देशेन ईरान-विरुद्धं पूर्व-निवारक-आक्रमणम् आरब्धम्, सः सम्पूर्णे देशे आपत्स्थितेः अपि घोषणां अकरोत्। ईरान-देशस्य आधिकारिक-माध्यमानुसारं ईरानदेशः प्रतिशोधाय भीषण-प्रत्युत्तराय च सज्जः वर्तते। एतानि आक्रमणानि परमाणु-सन्धि-विषये तथा च पश्चिम-एशियायां वर्धमान-युद्ध-भयस्य मध्ये जातानि। आक्रमणानां पश्चात् ईरानेन स्वस्य वायु-सीमा पिहिता दूरभाष-सेवाः च बाधिताः। प्रतिशोधस्वरूपेण, ईरानेन उपत्यकाक्षेत्रेषु आक्रमणानि कृतानि, येषु अबू-धाबी, बहरीन, कुवैत इत्यादिषु विस्फोटः अभवत् इति सूचना वर्तते।

---------------------------------------------------------

## भारतीयदूतावासः

इज़रायल-देशे अनुवर्तमानां सुरक्षा-स्थितिं उद्दिश्य भारत-सर्वकारेण तत्र स्थिताः भारतीय-नागरिकाः सावधानतया स्थातुं निर्दिष्टाः। इज़रायल-स्थितेन भारतीय-दूतावासेन भारतीय-नागरिकाः प्रार्थिताः यत् ते इज़रायल-प्रशासनेन निर्दिष्टान् सुरक्षा-निर्देशान् कठोरतया पालयेयुः। भारतीय-नागरिकाः परामृष्टाः यत् अग्रिम-सूचना-पर्यन्तं ते इज़रायल-देशाभ्यन्तरे अनावश्यकं

भ्रमणं न कुर्युः। सहैव आपत्काल-स्थितौ, भारतीय-नागरिकाः भारतीय-दूतावासेन सह 972-54-7520711 इति दूरभाषसंख्यायां सम्पर्कं कर्तुं शक्नुवन्ति।

---

## डीआरडीओ-रक्षाप्रणाली

रक्षा अनुसंधान एवं विकास संगठनेन, डी. आर. डी. ओ. इत्यनेन ओडिशा-तटस्य चांदीपुरस्य एकीकृत-परीक्षण-क्षेत्रात् अति-अल्प-परिधि-वायु-रक्षा-प्रणाल्याः वी. एस. ओ. आर. ए. डी. एस. त्रीणि सफलानि उड्डयन-परीक्षणानि सफलतया सम्पादितानि। रक्षामन्त्रालयः अवदत् यत् एतानि परीक्षणानि भिन्नवेगेन, परिधौ, ऊर्ध्वतायां च उड्डीयमानानां द्रुतगतिसम्पन्नानां विभीषिकानां निर्मूलनार्थं विशोड्स् प्रक्षेप-व्यवस्थायाः क्षमतां परीक्षणाय कृतानि। सर्वेषु उड्डयन-परीक्षणेषु प्रक्षेपास्त्रैः शत्रुवाहनानां अनुकरणं कुर्वन्तः उच्च-गति-वायु-लक्ष्यानि अवरोधितानि, सर्वासु चरम-संघर्ष-बिन्दुषु मिलित्वा विभिन्नेषु सङ्कट-परिदृश्येषु नष्टानि च कृतानि। रक्षामन्त्रिणा राजनाथसिंहेन डी. आर्. डी. ओ., सशस्त्रसेनाः, उद्योगाः इत्येताः च सफल-उड्डयन-परीक्षणाय अभिनन्दिताः।

---

## क्रिकेट्-क्रीडा

क्रिकेट्-क्रीडायां, हुबली-नगरे कर्नाटकं पराजित्य, जम्मू-कश्मीर-राज्येण प्रथमवारं रणजी-ट्रोफीति विजित्य ऐतिह्यं विरचितम्।

।। इति वार्ता: ।।